# काव्यशास्त्रीयचिन्तनेचैतन्यम्

प्रो. मिश्रो ऽभिराजराजेन्द्रः

अथाती चैतन्यजिज्ञासा । किमिदं चैतन्मं नाम ? चित् धातोर्ल्युटि प्रत्यये कृते चेतनविशेषणपदं सिध्यति । पुंसि प्रयुक्तोऽयमेव शब्दो जीवात्मवाचकः परमात्मवाचको मनोवाचको वा सन्दृश्यते । चेतनाशब्दोऽपि बुद्धिविवेक प्राणबोध संज्ञाधारणाजीवनादिसन्दर्भेषु भूयोभूयस्सम्प्रयुक्तश्चित् धातोर्युचि प्रत्यये कृते टाबन्तो निष्पद्यते। एवमेव मनःपर्यायभूतश्चेतश्शब्दोऽपि चिध्दातोरसुनि प्रत्यये विहिते सिध्यति । चेतनशब्दादेव ष्यञ्ि प्रत्यये कृते निष्पद्यते चैतन्यं यत्रवलु भारतीयदर्शनवाङ्मये परमात्मवाचकम् ।

द्वादशशाखं भारतीयदर्शनमित्यपि सुविदितचरं सर्वेषाम् । तत्र पुर्वमीमांसोत्तरमीमां-सासांख्ययोग न्यायवैशेषिकपदवाच्यानि षडास्तिकपदवी-मारूढानि वेदप्रामाण्यवन्ति । एवमेव लौकायतिकार्हतसौगतपदवाच्वानि त्रीणि नास्तिकानि वेदप्रामाण्यमनङ्गीकरणत्वात्। सौगतदर्शनं तावन्माध्यमिक - विज्ञानवादिवैभाषिकसौत्रान्तिकारव्यचतुश्शारवतया चार्वाकजैनदर्शनाभ्यां सहकृतः षट्शाखतामुपगच्छति । तदेवं द्वादशत्वं भारतीयदर्शनस्य । सर्वेष्वप्येषु दर्शनेषु चैतन्यप्रसङ्गः पदे - पदे सन्दृश्यते । नाऽत्रावसरस्तेषाम् समुपबृंहणस्य, तथापि साकल्येन वक्तुमेवं शक्यते यच्चैतन्यमेव भारतीयदार्शनिकचिन्तनस्य मेरुदण्डः ।

प्रकृतमनुसरामस्तावत् । दर्शनप्रकृतिकश्चैतन्यशब्दोऽसौ कथं काव्यशास्त्रीय-चिन्तनेऽन्तः प्रविष्टः ? प्रश्नोऽयं विवृतिसापेक्षः । अस्यैव प्रश्नस्य समाधानमवाप्यते भर्तृहरिप्रणीते वाक्यपपदीये । वाक्यपदीयकारो भगवान् भर्तृहरिः शब्दब्रह्मावधारणां स्फुटीकुर्वन् कथयति -

ऽप्रनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।

विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।।

अनया कारिकया व्याख्यातं भवति भर्तृहरिमतम् । दर्शने यत् स्वरुपं परब्रह्म, व्याकरणदर्शनेऽत्र तत्स्वरूपमेव शब्दब्रह्म । शब्दतत्त्वमक्षराख्यमिदं ब्रह्माऽप्यनादिनिधनम् । यथा वेदान्तनिरुपितं ब्रह्म चतुर्विधसृष्टिभावेन विवर्तते सगुणीभूय तथैव शब्दब्रह्मेदं वाङ्मयेऽर्थ भावेन विवर्तते । अस्मादेव शब्दब्रह्मणो जगतः प्रक्रिया प्रारभते । वाङ्मयी सृष्टिः शब्दब्रह्मण एव प्रवर्तते ।

येयं पिण्डजाण्डजस्वेदजोद्भिज्जमयी सृष्टिः परितोऽवलोक्यते, क्षणभङ्गुराऽसौ । सर्वेऽपि प्राणिनः परिमितवर्षायुष्यजीविनः । शतवर्षीयं मानवजीवनम् । विंशतिवर्षीयं वृषभादिपशूनां जीवनम् । घुणयूकालिक्षादयस्तु कतिपयदिवसमात्रजीविनः । नितरां जलसिक्तान्यपि ब्रीहियवगोधूमादीनि त्रिभिश्चतुर्भिर्वा मासैः स्वयमेव कृषिक्षेत्रे परिशुष्यन्त्येव । एवं हि, नाऽत्रजगति किमपि वस्तु स्थिरजीवितं स्थिरायतिकं वा । किञ्च निखिलोऽपि संसारः पाञ्चभौतिकः समायाते युगान्तकाले विनश्यति करकाकल्पः ।

एवं हि क्षणभङ्गुरा भौतिकी सृष्टिः । एवम्भूतेऽपि, तस्याः सृष्टेर्यद्वाङ्मयं रूपं तदक्षतं तिष्ठति । अमृतं न केनापि मानवेन दृष्टं निपीतं वा । तथापि तस्यास्तित्वमस्माभिः सर्वैरङ्गीक्रियते । कामं लोकेऽमृतस्य भूतरूपं नोपलभ्येत परन्तु तस्य वाङ्मयं रूपन्तु वर्तत एव । तदक्षतं तिष्ठति । अमृतस्वादोऽप्यना-स्वादितत्वात्तस्य कामं मानवैर्ज्ञायेत नाम, परन्तु पानकादिजगल्लभ्यपे-यास्वादाऽतिशायित्वं तस्य तु सर्वैरेव स्वीक्रियते । केचित्साधकास्तु समाधिजन्यानन्देन, केचिद्रतिसौख्येन, केचिच्च काव्यानन्देन तममृतस्वादं तुलयितुं बद्धपरिकराः परिलक्ष्यन्ते । एवं हि अननुभूतोऽप्यमृतास्वादोऽनुभूत इवाभाति ।

अस्मादक्षरब्रह्मण एव प्रारभते काव्यशास्त्रीयं चिन्तनम् । क्व व्याकरणं शब्दव्याकृतिसम्बद्धशास्त्रं क्व च ललितोचितरससन्निवेशमधुरं काव्यं तस्य शास्त्रं वेति सम्भवति विचिकित्सा केषाञ्चिदतत्त्वविदाम् । परन्तु सन्दर्भेऽस्मिन्

तादृङ्मनोभिस्सन्दिहानैर्ध्वनि-कारस्याचार्यानन्दवर्धनस्य स्थापनेयं स्मृतिपथमानेयायत् प्रथमे हि विद्वांसो वय्याकरणा-व्याकरणमूलत्वात्सर्व-विद्यानाम् इति (ध्वन्यालोके प्रथमोद्योते वृत्तिगतं वाक्यम्) ध्वनिकारमन्तव्यमिदं नाऽप्रामाणिकं यतो हि अभिधादि शब्दशक्तयः, कोमलादिवृत्तयः स्फोटादि सिद्धान्ताः सर्वेऽपि व्याकरणविवेच्यतां निर्वहन्ति ।

एकतस्तु ध्वनिकारो व्याकरणमूलत्वं निर्दिशति सर्वविद्यानामपरतस्तु काव्यमीमांसाकारो राजशेखरः स्फुटं भणति चतुर्दशविद्यास्थानं विवृण्वानः सकलविद्यास्थानैकायतनं पञ्चदशं काव्यं विद्यास्थानम् इति यायावरीय इति । अनेन एतदुक्तं भवति यद् व्याकरणमिव काव्यमपि सर्वविद्योपकारकम् । अतएव व्याकरणकाव्ययोः समानं महत्त्वं प्रतिभाति विषयैकत्वञ्च । एवं सत्युभेऽपि मिथः समुपकारके परिपूरके चेत्यपि वक्तुं शक्यते ।

तदेव शब्द ब्रह्म व्याकरणशास्त्रस्य काव्यशास्त्रेऽपि रसरूपतया प्रतिष्ठितं वर्तते यत्रवलु चैतन्याधिष्ठानम् । तदेवाधिकृत्य कथयति वाक्यपदीयकारः -

इदमाद्यं पदस्थानं सिंद्धिसोपानपर्वणाम् ।
इयं सा मोक्षमार्गाणामजिह्मा राजपद्धतिः ॥
तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः ।
तस्य प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते ॥

काव्यान्तस्तत्त्वसमीक्षायां तदेव ब्रह्मामृतं रसत्वेन प्रतिष्ठितं यद्बृहद्व्यारव्यानं निबन्धेऽस्मिन् करिष्यते ।

सहृदयहृदयाह्लादि शब्दार्थमयत्वमेवकाव्यत्वलक्षणमित्यानन्दवर्धनो ध्वन्यालोकेऽभिव्यनक्ति । शब्दार्थयोर्नित्यसम्बन्धः । अनयोरेकतरः कश्चिदपि एकलः स्थातुंन प्रभवति । यथा वीचिर्जलं विना जलं वा वीचिंविना स्थातुं न प्रभवति तथैव शब्दार्थावपि समन्वितावविनाभावसम्बन्धेन । उभयोः शाश्वतिकं साहचर्यं मनसिकृत्वैवालाङ्कारिकैः काव्यं परिभाषितं शब्दार्थौ काव्यमिति ।

यद्यपि शब्दार्थौ उभयोरपि शब्दानुशासनकाव्यानुशासनयोः समानरूपेण विवेच्यविषयभूतौ। तथापि तत्र विवेकोऽयमङ्गीकरणीयो यत् व्याकरणे शब्दस्यैव प्राधान्यम्। व्याक्रियन्ते शब्दा अनेनेति व्याकरणम्। शब्दशुद्धिरेव व्याकरणस्य प्रधानं लक्ष्यम्। परन्तु काव्ये काव्यशस्त्रे वा ऽ र्थस्यैव प्राधान्यम्। शब्दप्रधानानि वेदशास्त्रादीनि। परन्त्वर्थप्रधानं काव्यम्। यावत्काव्यप्रयुक्तानां शब्दानां साधारणानामपि वाच्यार्थो लक्ष्यार्थो व्यङ्ग्यार्थो वा नाऽवगम्यते तावन्न का ऽपि सार्थकता श्रुतिगोचरीभूतानां शब्दानाम्। अतएवाऽमिप्राय एव मुख्यतया काव्यम्। तस्मादेव व्याकरणे सातिशयं श्रद्धानोऽपि पण्डितराजो जगन्नाथो न केवलं शब्दमेवापितु रमणीयार्थप्रतिपादकमेव शब्दं काव्यं मनुते।

वस्तुतः पदं वाक्यम् अर्थश्चेति त्रितयमपि शास्त्र त्रयप्रवर्तकत्वेनोपतिष्ठते। तत्र पदं (अनिष्पन्नावस्थायां तदेव प्रातिपदिकं शब्दो वाऽपि) पदार्थश्चेति द्वयं व्याकरणशास्त्रस्य विषयभूतम्। वाक्यमाकाङ्क्षासन्निधियोग्यतानिर्व्यूढं वाक्यार्थश्चेति द्वयं मीमांसाशास्त्रस्य विषयभूतम्। काव्यार्थश्च वाच्यलक्ष्यव्यङ्ग्यस्वरुपः काव्यशास्त्रस्य विवेच्यविषयभूतः। अर्थमात्रस्य काव्यत्वमनेनैव सिध्यति यदानन्दवर्धनः सिद्धेऽपि रसस्य काव्यात्मत्वे प्रतीयमानार्थमेव काव्यजीवितभूतं मन्यते। अनेन विशदीभवति तथ्यमिदं यद् ध्वन्यालोककारः अर्थस्वरूपस्य काव्यस्यात्मानमपि कमपि विशिष्टकोटि-कमर्थमेवाङ्गीकरोति न पुनरलङ्कारं रीतिं रसं वा!

वस्तुतः समग्रमेव विश्वं शब्दमात्रस्य परिणामः। विश्वं नाम किम् ? मनुष्यः पक्षी पशुः घटः पटः कूपस्तडागोऽम्बुद इति लक्षकोट्ययुतनियुतार्बुदमिताः शब्दा एव विश्वं परिचाययन्ति। एभिश्शब्दैरेव विविधवस्तूनां बोधो भवति। अयं घट इत्युच्चारिते सति यज्ज्ञानमवाप्यते तज्ज्ञानं घटरूपवस्तुना सार्धं तादात्म्यमुपैति। एवं सत्येव घटोऽयमित्युच्चारणेन घटरूपस्य पदार्थस्य बोधो जायते। तदित्थं पदार्थ - पदार्थबोधकशब्दयोश्च भवत्येव तादात्म्यम्। यद्येवं ना भविष्यत्तर्हि घटोऽयमित्युच्चारिते पटस्यापि ज्ञानं सम्भवेत्। परन्तु व्यवहारे नैतत्परिलक्ष्यते। अनेन

एतदुक्तं भवति यत्पदार्थः पदार्थज्ञानश्चेत्युभयमपि शब्दस्यैव परिणामो मिथस्तादात्म्यभावात् । किञ्च, यथा घटो घटज्ञानं वा शब्दस्य परिणामस्तथैव समग्रेयं सृष्टिः शब्दमात्रपरिणामभूता । तदेवोच्यते भर्तृहरिणा -

न सो ऽ स्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥
शब्दस्य परिणामोऽयंमित्याम्नायविदो विदुः ।
छन्दोभ्य एव प्रथममिदं विश्वं व्यवर्तत ॥

सौगता विज्ञानवादिनो ऽ पि स्थूलस्वरुपं जगतो ऽ नङ्गीकुर्वाणा तस्य विज्ञानमात्रं स्वीकुर्वन्ति । पाश्चात्यदार्शनिको बर्कलेनामा ऽ पि प्रत्ययमात्रं सत्यं मनुते । तदयं निर्गलितार्थो यत्समग्रो ऽ पि संसारः शब्दादेव प्रादुर्भवति, शब्देष्वेव प्रविलीयते । तथा च भगवान् भर्तृहरिः

ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम् ।
विवृतं सर्वमात्राभ्यस्तास्वेव प्रविलीयते ॥

भर्तृहरेरयमेव सिद्धान्तः संस्कृतकाव्यशास्त्रस्य मेरुदण्डभूतः । शब्दार्थशरीरस्य काव्यस्य, पुरुषशरीरस्य कटककुण्डलादिवत्, अनुप्रासादयो ऽ लङ्काराः । अवयवसंस्थानादिवद् वैदर्भीप्रभृतयो रीतयः । आत्महना रोगा इव श्रुतिकटुत्वादि दोषाः । शौर्यपराक्रमादिगुणा इव माधुर्यादयो गुणाः । निखिलसंहननाऽनुप्राणकात्मेव काव्यात्मभूतो रसः । स एव काव्यात्माऽलङ्कारो रीतिध्वनिवक्रोक्तिरौचित्यो वेति केचित् ।

तत्र रसस्य काव्यात्मत्वे न कस्यचिदप्याचार्यस्य विमतिः । ये रसवादिन आचार्याः कोहलनन्दिकेश्वरभरतादयस्ते तु रसं ब्रह्मानन्दसहोदरकल्पं महच्चैतन्याधिष्ठानभूतं काव्यात्मभूतं मन्यन्त एव । परन्तु ये काव्यात्मत्वाङ्गीकरणे सम्प्रदायान्तरवादिनस्ते ऽ पि रसस्यापरिहार्यत्वं काव्ये स्वीकुर्वन्त्येव । तथा च प्रतीहारेन्दुराजः काव्यालङ्कार-सारसंग्रहस्योद्भटप्रणीतस्यलघुवृत्तौ तन्मतमुद्धरति-

रसाद्यधिष्ठितं काव्यं जीवद्रूपतया यतः ।

कथ्यते तद्रसादीनां काव्यात्मत्वं व्यवस्थितम् ॥

उद्भटस्तावदलङ्कारपक्षधरस्तथापि रसस्य काव्यजीवातुभूततामसौ स्वीकरोत्येव । रसवदलङ्कारमाध्यमेन सर्वे ऽ प्यलङ्कारसम्प्रदायपक्षपातिन आचार्या रसस्य सत्तां स्व्यकुर्वन्। आचार्यभामहोऽकथयत् -

रसवद्दर्शितस्पष्टश्टङ्गारादिरसं यथा ।

काव्यादर्शकारो दण्डयपि प्रतिपादितवान् -

इह त्वष्टरसायत्ता रसवत्ता स्मृता गिराम् ।

मधुरं रसवद् वाचि वस्तुन्यपि रसस्थितिः ॥

व्यक्तिविवेककारो महिमभट्टस्तु सकलमपि ध्वनिप्रपञ्चं अनुमाने ऽ न्तर्भावयितुं बद्धपरिकरः परिलक्ष्यते । अभिधामात्रसमर्थकः सन्नप्यसौ रसमाहात्म्याङ्गीकारप्रसङ्गे न मनागप्यौदासीन्यं भणते । तद्यथा,

काव्यस्मात्मनि संज्ञिनि रसादिसमेनकस्यचिद्विमतिः

वस्तुतः काव्यात्मत्वसम्बद्धानां समेषां तत्त्वानां रस एवान्तः - पातिता समवलोक्यते। अलङ्कारध्वनेस्तु रसपर्यवसितत्वं स्वयमानन्दवर्धनोऽङ्गी करोति। उपकर्त्रो रसादीनामिति ब्रुवाणो विश्वनाथो रीतिमपि काव्यात्मभूतां रसनिष्पत्ति-सहायिनीमेव मनुते । ध्वनेस्तु प्रकृष्टतमरूपं रसध्वनिरेव । कुन्तकाभिमता प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाभिधा वक्रोक्तिरपि रसचर्वणात्मकैवेति स्वयमाचार्यकुन्तको भणति । तद्यथा -

शब्दार्थौ सहितौ वक्रकविव्यापार शालिनि ।

बन्धे व्यवस्थिते काव्यं तद्विदाह्लादकारिणी ॥

कुन्तको महिमभट्टश्चोभावेव वैचित्र्यमात्रसिद्धिं वक्रोक्तिं प्रयोजनभूतां मन्येते। तच्चवैचित्र्यं केवलमाह्लादाय, केवलमानन्दाय रसप्रतीत्यर्थं वा । तदेवं वक्रोक्तेरपि

रसनिष्ठता प्रमाणिता तिष्ठति । तद्यथा -

लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये ।
काव्यस्यायमलङ्कारः कोऽप्यपूर्वो विधीयते ॥ इति कुन्तकः ॥
प्रसिद्धं मार्गमुत्सृज्य यत्र वैचित्र्यसिद्धये ।
अन्यथैवोच्यते सोऽर्थः सा वक्रोक्तिरुदाहृता ॥ इति महिमभट्टः ।

अथाऽन्ते क्षेमेन्द्राभिमतम् औचित्यतत्त्वम् । तत्रापि अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् । प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परेति कथयद्भिरानन्दवर्धनाचार्यैरौचित्यस्यापि रसान्तर्भावितत्वं समुदघोषितम् । ध्वनिकारमन्तव्यं विशदीकुर्वन् महामाहेश्वरोऽभिनवगुप्तपादो लोचनटीकाया-मुपन्यस्यति उचितशब्देन रसविषयमौचित्यं भवतीति दर्शयन् रसध्वनिजीवितत्वं सूचयति । तदभावे हि किमपेक्षया इदमौचित्यं नाम सर्वत्रोद्घोष्यते इति भावः (ध्वन्यालोकलोचनम् १.१)

एवं हि रसस्तु रस एव, सर्वाचार्यसमर्थितः काव्यात्मभूतः पदार्थः कश्चित्। अपरे काव्यात्मपदवीमारूढा अलङ्कार रीति - ध्वनि - वक्रोक्त्यौचित्यादयोऽपि रसगर्भ एव पर्यवसिता इति सप्रमाणं प्रदर्शितम् ।

स एव रसः काव्यस्यात्मा । आत्मत्वमण्डितत्वादेव रसस्य चैतन्या-धिष्ठानताऽपि स्पष्टीभवति। कथमिति चेत्सम्प्रति साङ्गोपाङ्गं सविस्तरञ्च निरूप्यते। सन्त्यनेके प्रश्ना अत्र। को ऽ यं रसो नाम ? किंस्वरूपो ऽ यं रसः ? कथञ्च रसस्यास्य काव्यात्मता ? कथं वा रसस्य ब्रह्मानन्दसहोदरत्वम् ? चैतन्येन वा सार्धं रसस्य कीदृक् सम्बन्धः ? इमे सर्वेऽपि प्रश्ना अलङ्कारशास्त्रे समाधानधिया निरूपिताः सन्ति ।

वस्तुतः रसशब्दोऽयं नेदम्प्रथमतया काव्यशास्त्रे प्रयुक्तोदृश्यते । ब्रह्मस्वरूपनिरूपणप्रसङ्गे श्रुतावेवास्य शब्दस्य प्रयोगो वर्तते । तद्यथा तैत्तिरीयोपनिषदि (३.६) प्रतिपादितम् -

रसो वै सः । रसं ह्येवायम् लब्ध्वाऽनन्दी भवति ।
एवम् हि रसस्वरूपं परब्रह्म । आनन्दस्वरुपम् वाऽदः ।

यतो हि रसास्वादनक्षणे रसिको विगलितवेद्यान्तरस्तिष्ठति तत एव रसस्वरुपं परबह्मेत्युक्तम्। ब्रह्माद्वैतसुखमनुभवन् साधकोऽपि निर्विकल्पकसमाधौ तमेव रसास्वादनस्थितिं भजते । रस्यते आस्वाद्यते इति रसः । इयं रसन-प्रक्रियाऽत्यन्तमेव विलक्षणा भवति । अस्यां रसनप्रक्रियायां चर्वणापरसंज्ञायां तदाकाराकारित चित्तवृत्तिर्जायते। ज्ञातृज्ञेयज्ञानानां त्रयाणां पार्थक्यमेव तत्र विनश्यति । अन्येषु अनुभवेषु ज्ञानसन्दर्भेषु वा नेयं स्थितिः । सर्वोऽप्यनुभवः सविकल्पक एव भवति । अहं घटं वेद्मीत्यनुभवेऽहं ज्ञाता, घटो ज्ञेयं, घटं वेद्मीति ज्ञानम् । परन्तु एतत् त्रितयमपि घटज्ञानप्रक्रियाया पृथक्त्वेन तिष्ठति । परन्तु, अहं ब्रह्मास्मीत्यनुभवे तत् त्रितयमपि पृथक्त्वरहितं सत् ब्रह्मरूपतामेवोपैति । सर्वथा तथैव रसचर्वणा दशायामपि चैतन्यस्य सत्त्वोद्रेकवशात् सर्वमपि पार्थक्यं विनश्यति, कश्चिदखण्डाववबोधश्च समुज्टम्भते । यथा पानकरसः एलालवङ्ग मरिचशर्करादिसाधितः विविधास्वादसहकृतः सन्नपि पीयमानो विलक्षणमेव कमपि स्वादमेलालवङ्गा-दिस्वादव्यतिरिक्तं समुपायनीकुरुते तथैव रसोऽपि, निजावयवास्वादव्यतिरिक्तं कमपि विलक्षणं स्वादमाहात्म्यं वा जनयति!

तत्कि रसोऽप्ययं संघटकैयुक्तम् ? ञ्रोमिति ब्रूमः । नाट्यशास्त्रकारो भरताचार्यस्समाधत्ते प्रश्नमिमम् -

नहि रसादृते कश्चिदर्थः प्रवर्तते । तत्र
विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः ।

इदमेव रसप्रतिष्ठापनाविषयकं भरतस्य रससूत्रम् । भरतो भणति यदस्माकं हृदये तिष्ठन्ति चित्तवृत्तयः । इमा यद्यप्याशुविनाशिन्यस्तथापि वासनारूपत्वात् सुक्ष्मरूपतया च सततविद्यमानत्वात् स्थायिभावमुपमान्तीमाः । आचार्यो ऽ नान्तदाक्षः साहित्यदर्पणकृत्तनयो ऽ मिधत्ते -

वासनाऽनादिकालीना याऽसौ हृदि सचेतसाम् ।
स्वसामग्रीं समासाद्य व्यक्ता सैतिरसात्मताम् ॥

आचार्यमम्मटस्तु स्थायिभावानिमान् अविच्छिन्नप्रवाहपदवाच्यान् मन्यते। ननु स्वसामग्रीं समासाद्येत्युक्तम् । तत्काऽसौ सामग्री ? तदेव व्याख्यायते नाट्यशास्त्रकारेण रससूत्रमाध्यमेन । असौ स्थायिभावो रति हासशोकादिनवसंख्यः स्वसामग्रीं विभावानुभावव्यभिचारिभावाख्यां समासाद्य व्यक्तीभूय रसात्मतामेति। एवं हि सततविद्यमानत्वमविच्छिन्नत्वञ्चेति वैशिष्ट्यद्वयं स्थायिभावस्य । स्थायिभावा इमे न जातु विरुद्धभावैरभिभूयन्ते ऽ पितु विरुद्धभावानेवात्मरूपतां नयन्ति । क्षारं जलं सागरस्य नदीनां जलराशिभिर्यथा मदत्वमानेतुमशक्यं परन्तु क्षारजलेन सागरस्य स्वयमपि क्षारीभवितुं शक्यम् । सैव स्थितिः स्थायि-भावानाम् । यथा ऽ ह दशरूपककारः,

विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः ।
आत्मभावं नयत्यन्यात् स स्थायी लवणाकरः ॥

स्रक्सूत्रवृत्त्या स्थायिभावा इमे ऽ न्येषां भावानामनुगामुका भवन्ति । आचार्यप्रवरो भोजदेवः स्थायिगुणान् साकल्येन पुरस्कुरुते –

स्रक्सूत्रवृत्त्या भावानामन्येषामनुगामुकाः ।
न तिरोधीयते स्थायी तैरसौ पुष्यते परम् ॥
चिरं चित्तेऽवतिष्ठन्ते सम्बध्यन्ते ऽ नुबन्धिभिः ।
रसत्वं ये प्रपद्यन्ते प्रसिद्धाः स्थायिनो ऽ त्र ते ॥

एवं हि स्थायिभावो ऽ क्षीणवासनाजन्यश्चैतन्यांश एव । अयमेव स्थायिभावो विभावानुभावव्यभिचारि संयोगाद्रसीभूय निष्पद्यत । तत्र

ज्ञायमानतया तत्र विभावो भावपोषकृत् ।
आलम्बनोद्दीपनत्वप्रभेदेन स च द्विधा ॥
अनुभावो विकारस्तु भावसंसूचनात्मकः ।
विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्ना कल्लोला इव वारिधौ ॥

विभावानुभावव्यमिचारिभावेभ्यो व्यतिरिक्ताः सात्त्विकभावा अपि भवन्ति

केचन । ऋप्रवहितं मनस्सत्त्वमित्युच्यते । तत्प्रयोजनं हेतुरस्येति सात्त्विकभावः । रामादीनामनुकार्याणां सुखदुःखाभ्यां सहृदयानां हृदयानि भावयन्त्वेते सात्त्विका भावाः । एते निसर्गत एव भवन्ति दुर्वाराः । यदुक्तमाचार्यैः,

पृथग्भावा भवन्त्यन्येऽ भावत्वेऽपि सात्त्विकाः ।
सत्त्वादेव समुत्पत्तेस्तच्च तद्भावभावनम् ॥

तदयं नाम रसस्यपरिवारः । स्थायिनो रत्यादेविर्भावाः कारणभूताः, अनुभावाः कार्यभूताः, व्यभिचारिभावाश्च सहकरिभूता । एभिरेव संघटकै र्विभावाद्यैः पुष्टः स्थायिभावो रसरुपेण निष्पन्नी भवति । यथाऽन्धकारावृतो घटो दीपप्रकाशे व्यक्तो भवति न तथा रसो ऽ पूर्वसिद्धत्वात् । वस्तुतो रुपान्तरपरिणतो भवति रसो दध्यादिन्यायेन । यथा दुग्धंमम्लसाहाय्येन दधिरुपेण परिणमति तथैव स्थायिभावो ऽ पि रसरुपेण परिणमति ।

चैतन्याधिष्ठानभूतस्य रसस्य प्रतीतिर्भवतीति कथनमपि वस्तुत उपचारमात्रम्। अन्यथा स्वयमेव रसो विभावादीनां सिद्धावस्था भवति, नपुनस्साध्यावस्था, यथा परिपक्कमेव तण्डुलजातमोदनं भवति तथापि ओदनंपचतीति व्यवहारे कथ्यते, तथैव रसस्य प्रतीतिर्भवतीत्यपि व्यवहारो ऽ वधेयः । तथा चा ऽ नान्तदासः – न खल्वोदनः पूर्वसिद्धो व्यज्यते किन्तु पक्कस्सन् ओदनो भवतीति । तथा ऽ यमपि व्यक्तस्सन् रसो भवतीत्पर्थः ।

किंस्वरूपो ऽ यं रस इत्याचष्टे साहित्यदर्पणकारः

सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः ।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः ॥
लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः ।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः ॥

तदेवं काव्यात्मभूतो रसः सत्त्वोद्रेकात् अरवण्डः स्वप्रकाशः ऋानन्दचिन्मयो वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः लोकोत्तरचमत्कारप्राणश्च भवति । सत्त्वोद्रेकस्य

को ऽ भिप्रायः ? रजस्तमोभ्यामस्पृष्टं मनः सत्त्वमिहोच्यते । अतएव रजस्तमसी अभिभूय तादृग्गुणविशिष्टस्य चित्तस्याविर्भाव एव सत्त्वोद्रेकइत्युच्यते। अरवण्डपदेन पानकरसन्यायेन रसस्याखण्डावबोध; कश्चिद् गृह्यते । रसास्वादे न तावदङ्गभूतानां विभावादीनां पृथक् स्वादः कश्चनानुभूँयते । उताहो समग्रस्यापि रसस्य विलक्षण एव कश्चिदखण्डाऽनुभवो ऽ वाप्यते। चिन्मय इत्यत्र स्वरूपो विस्मया ऽ परपर्यायः, स एव प्राणो यस्य सः । अनेन चित्तविस्तृति-क्षमत्वं सिध्यति रसस्य । अस्मिन् सन्दर्भे समुद्धरति साहित्यदर्पणकारो गोष्ठीगरिष्ठ-विपण्डितमुख्यस्य स्ववृद्धप्रपितामहस्य श्रीमन्नारायणपादस्य मतम्-

रसे सारश्चमत्कारः सर्वत्रा ऽ प्यनुभूयते ।
तच्चमत्कारसारत्वे सर्वत्राऽप्यद्भुतो रसः ॥

एवं हि विभावानुभावसञ्चारिसहकृतो रस आस्वाद्यते । त्रास्वादनं नाम रजस्तमोभ्यां विनिर्मुक्तस्य चित्तस्य सत्त्वप्रवणस्योद्रिक्तिः । यावद्रजस्तमो ऽ भिभूतं सत्त्वं क्वतावदानन्दा ऽ नुभवः ? क्वतावच्चित्तविस्तारः ? क्व तावद्-वेद्यान्तर-स्पर्शशून्यता? क्व तावत्स्वप्रकाशत्वं चिन्मयत्वं वा ? वस्तुतः सत्त्वोद्रेके जात एव मनोमुकुरो रसिकानां विशदो जायते । मनोमुकुरे विशदीभूत एव साधारणीकरणमहिम्ना ऽ साधारणमपि दुःखं सुखं वाऽन्येषां स्वकीयमिव प्रतीयते। एतत्सर्वमपि चैतन्यमात्रस्य समुज्जृम्भणम् । विशदीभूतचैतन्य एव जनस्यहृदयपदवाव्य इति महामाहेश्वर आचार्योऽभिनवगुप्तपादः

एषां काव्यानुशीलनाभ्यासवशाद् विशदीभूते मनोमुकुरे वर्णनीयतन्मयी-भवनयोग्यता ते हृदयसंवादभाजस्सहृदयाः (लोचनम्)

त्रात्मानन्दसमुद्भव एव रसास्वाद इत्याचार्याः । वस्तुतस्तु आस्वाद एव रसो नाऽन्यत्किं चित् । यथा पूर्वमुक्तम्मया यत् रसस्यास्वादाऽनतिरिक्तत्वं यत् रसस्यस्वादोऽवाप्यते रसश्चर्व्यत इत्येवमादिका अभिव्यक्तयस्तु काल्पनिक्य एव। य आत्मानन्दानुभवरूपास्वादरस एव रसः । अत एव रसस्यास्वादा अनतिरिक्तत्वं सर्वथा

सिद्धम् । यथोद्धृतं साहित्यदर्पणकारेण - रस्यमानतामात्रसारत्वा-त्प्रकाशशरीरादनन्य एव हि रसः ।

मनस्तावत् त्रिगुणात्मकम् । यदा तस्मिन् सत्त्वांशस्य प्रकाशो जायते रजस्तमस्यभिभूय तदैव प्रभवति सुखोत्पत्तिः, आनन्दातिरेको वा । परन्त्वयमेव सत्त्वांशो रजस्तमोभ्यामभिभूतस्सन् वैषयिकं सुखं जनयति । प्रकाशानन्दमयत्वादेव रस त्र्प्रानन्दात्मिका संविद सृजति यस्मिञ्जायते वेद्यान्तरस्पर्शशून्यता । ब्रह्मास्वादसहोदरोऽयं रसो न पुनस्साक्षात् ब्रह्मास्वाद एव । कस्मात् ? यतो हि ब्रह्मानुभूतिर्भवति निर्विकल्पा निरवधिश्च । रसानुभूतिस्तावद् विभावादि जीवितावधिस्सविकल्पा च भवतीति विशेषः। किञ्च, प्राक्तनजन्मानुगतवासनानां परिपाकावस्थैव भवति रसावस्थाऽतएव न परमार्थतः क्षीयन्ते वासना अस्यामवस्थायामपि । ता अक्षतास्तिष्ठन्ति यथाकथञ्चित् परन्तु ब्रह्मीभावे वासना इमाः सर्वथा लयमुपयान्ति । रसास्वादस्य सविकल्पताया इदमेव तावद्रहस्यम् । स्वाकारवदभिन्नोऽप्ययंरसः । यथा विज्ञानवादिनस्सौगतदार्शनिका ज्ञानस्वरूपं तदभिन्नं बाह्यजगच्च यद्यप्येकमेव मन्यन्ते तथापि बाह्यजगद् ज्ञेयसंज्ञयाऽ वबोध्यते तथैव रसास्वादयोरभिन्नत्वेऽपि रस आस्वाद्यत इत्युपचारतः कथ्यते । अन्यथा यो रसस्स एवाकाराऽभिन्नो भवतीति वा । एवं हि यथा शिरोमात्रस्वरुपस्य राहोः प्रसङ्गे राहोः शिर इत्यौपचारिक प्रयोगो विधीयते तथैवाऽस्वादमात्ररुपस्य रसस्यापि प्रसङ्गे रसस्यास्वादो रसस्य प्रतीतिरित्येवं समुच्यते ।

भवतु नाम । रसः कथमास्वाद्यते ? तस्मिन् आस्वादे खलु चैतन्यस्य का भूमिकेति सम्प्रति निरुप्यते । इदन्तु सुविदितचरं समेषां विपश्चि च्चुञ्चूनां यन्मीमांसको लोल्लटो रसस्योत्पत्तिं नैयायिकश्शङ्कुको रसस्यानुमितिं, सांख्यमतानुगो भट्टनायकस्तद्भुक्तिं, महामाहेश्वरोऽभिनवगुप्तश्च रसस्याभिव्यक्तिं स्वीकुर्वन्ति । तन्निखिलोऽपि सन्दर्भः परिहीयतेऽत्र काव्यशास्त्रीयग्रन्थोप-निबद्धत्वात् चैतन्यमात्रव्याचिरव्यासुत्वाच्च ।

स्वाकारादभिन्नो रस इत्युपर्युक्तम् । परन्तु प्रतिपन्नेऽसत्यस्मिन् स्वाकारवादे इदमपि

स्पष्टं जायते यत् रस्यमानतामात्रसारत्वात् रसो ऽ यं ना ऽ परं किञ्चिदपितु संविन्मात्रम्, ज्ञानमात्रम् । परन्तु ज्ञानन्तु सदैव स्वविषयाद् भिन्नं दृश्यते यथा घटज्ञानं घटात् । रसो यदि ज्ञानमात्रं तर्हि स एव रसो ज्ञानविषयतामपि कथमुपपद्यत? यथा ऽ हमहेश्वरस्तर्कालङ्कारः

स्वाकारवादे हि विषयो ज्ञानाभिन्नो ज्ञानस्याकार एवेति ।

सम्प्रत्युच्यते । हेतुस्तावद् द्विविधः कारको ज्ञापकश्चेति ।

असिद्धं वस्तु यो निष्पादयति स हेतुः कारको यथा दण्डचक्रादयो घटस्य । घटस्तु पूर्वतो ऽ सिद्धो ऽ विद्यमानो वा । तं घटं घटयन्ति दण्डचक्रादयः । पूर्वतः सिद्धमपि पदार्थं यो ज्ञापयति स खलूच्यते ज्ञापकहेतुर्व्यञ्जकहेतुर्वा, यथा दीपो घटस्य । घटस्तु पूर्वत एव कक्षे विद्यमानः । दीपस्तावदन्धकारवृतं तं पूर्वस्थितं घटं केवलं ज्ञापयति । अत्रापि व्यञ्जकस्य दीपस्य व्यंग्यस्य घटस्य च पार्थक्यं सर्वथा स्पष्टम् । परन्तु यदि रसः संविन्मात्रमङ्गीक्रियते तदाक्व तिष्ठति तस्य व्यङ्ग्यता? क्व सम्भवति तस्य व्यञ्जनाविषयत्वम्?

अस्याः समस्यायाः समाधानं प्रस्तुवता साहित्यदर्पणकृता समुच्यते यद्रसो ऽ यं कृतिज्ञप्तिविलक्षणः कश्चिदन्य एव स्वदनव्यापरः नायं व्यापारः कथमपि लौकिकः । स्वसंवेदनमात्रविषयत्वात् न वर्तते रसे ऽ स्मिन् विषयान्तरसम्पर्कः सम्भवति स यथा लौकिकज्ञाने । योगजप्रत्यक्षसन्निभो ना ऽ यं रसः साधननिरपेक्षो ऽ पि, विभावादिसाधनापेक्षित्वात् । एवं हि सर्वतोदृष्ट्या ऽ पि रसो ऽ यमलौकिक एव प्रतिभाति ।

स चा ऽ लौकिको रसः पुर इव परिस्फुरन्, हृदयमिव प्रविशन् सर्वाङ्गीणमिवाऽलिङ्गन्, अन्यत्सर्वमिव तिरोदधत् ब्रह्मास्वादमिवानुभावयन्तभिव्यज्यते । वाग्देवतावतारो मम्मटो ऽ प्यलौकिकचमत्कारकारिणं मनुते रसमिमम् । चमत्कारस्तु चित्तविस्तारः । चमत्कारस्तु विस्मयावहत्वम् । अस्मादेव चमत्कारमाहात्म्यात् करुणादावपि रसे सुखमेव जायते । अत्र सहृदयानामनुभव एव प्रमाणम् । तद्यथा साहित्यदर्पणकारः

करुणादावपि रसे जायते यत्परं सुखम् ।
सचेतसामनुभवः प्रमाणं तत्र केवलम् ॥
किञ्च तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः ।
तथा रामायणादीनां भविता दुःखहेतुता ॥

ह्लादैकमयी काव्यसृष्टिरिति मम्मटाचार्यो ऽपि । रसो भवत्येवा ऽनन्दपर्यवसायी । शोकः श्लोकत्वमागतः (ध्वन्या. १.९) इति कारिकांशं विवृण्वन्नभिनवगुप्तपादोऽपि कथयति – न तु मुनेः शोक इति मन्तव्यम् । एवं हि सति तद्दुःखेन सोऽपि दुःखित इति कृत्वा रसस्यात्मतेति निरवकाशं भवेत् । नतु दुःखसन्तप्तस्यैषा दशेति (लोचनम्)

कस्मात्पुना रसानुभवोऽयमानन्दमात्रपर्यवसायीत्यपि विचारणीयः । दशरथमृत्युसन्दर्भं रावणापहृतसीताविलापसन्दर्भं जटायुप्राणव्यथासन्दर्भञ्चाधीत्य कथं न वयं दुःखिता भवामः । कथं वा तत्तत्सन्दर्भपरिशीलानान्ते त्र्प्रानन्दाश्रुपातमेदुराः सन्तो ऽपि हार्दिकं कमपि विलक्षणपरितोषमात्रमनुभवामः? किं तद्दुःखं न दुःखम् । कस्मात्पुनस्तद् दुःख प्रच्छन्नसुखतामपयाति ।

उच्यते । तत्र कारणत्रयम्वरीवर्ति । कवेरानन्दमात्रनिसर्गस्तत्र प्रथमं कारणम् । रसचर्वणाया त्र्प्रानन्दमात्रपर्यवसायित्वं द्वितीयं कारणम् । साधारणी-करणञ्च तृतीयं कारणम् । त्र्प्रनेन कारणत्रयेणैव काव्यवर्णिताः शोकक्रोधनिर्वेद-भयादिभावा त्र्प्रानन्दसपत्नभूता अपि सुखरुपेणैवा ऽनुभूयन्ते ।

तत्रा ऽद्यं कारणं कवेरात्मारामस्थितिः । प्रायेण सर्वेऽपि सांसारिका जना बुभुक्षित एव जायन्ते, जीवन्ति म्रियन्ते च । नेयं बुभुक्षा खाद्यपदार्थस्य ! बुभुक्षेयं तेषां रतेः शोकस्य स्थायिभावान्तराणां वा । तस्मादेव कारणादापतित एव रतिप्रसंगे ते रतिभावमास्वाद्या ऽकण्ठं श्रृङ्गारमग्नाः सन्दृश्यन्ते । समायात एव मृत्युप्रसंगे तां मृत्युव्यथामाकण्ठं भुक्त्वा ते सोरस्ताडं सनभो विदारिचीत्कारं विलपन्ति । तांस्तान् भावांस्ते क्षुधार्ताः संसारिणो परमार्थत आत्मसात्कुर्वन्ति । परन्तु त्र्प्रात्मारामतया जीवन् कविराकण्ठपरितृप्त एव जायते, म्रियते च । न तस्य मनागपि रतेः, शोकस्य,

भयस्योत्साहस्य वा चिरवादिषा । तस्मान्नाऽसौ भावैरेभिरभिभूयते । शोकमुपवर्णयन्नपि न भवत्यसौ शोकसन्तप्तः । रतिं प्रस्तुवन्नप्यसौ न भवति रतिभान् । भयं प्रतिपादयन्नप्यसौ न मनागपि भयभीतः परिलक्ष्यते । वस्तुतो जन्मजन्मान्तरानुगतपरितोष निर्भरस्सन् कविः कमपि भावमनिगीर्य सद्यस्तं वमति । तद्वमनमेव समुच्यते काव्यमित्यहो वैलक्षण्यं कविकर्मणः ! यदाह हृदयदर्पणकारो भट्टनायकः

यावत्पूर्णो न चैतेन तावन्नैववमत्यमुम् इति । त्र्प्रथेदानीं द्वितीयं कारणं निरुप्यते यदस्ति रसस्यानन्दमात्रपर्यवसायित्वम् । वस्तुतो रसोद्रेके सति रजस्तमो ऽभिभावपुरस्सरं मनस्सत्त्वोपहितं जायते । तच्च सत्त्वं निसर्गत एव लघु प्रकाशकञ्च भवति । अतएव सत्त्वे प्रसह्य समुदिते सति सर्वो ऽप्यनुभवस्सुखात्मक एव जायते चित्तस्य विस्तृतिवशात् । तथा चाह साहित्यदर्पणकारः -

ये खलु वनवासादयो लोके दुःखकारणानि इत्युच्यन्ते त एव हि काव्यनाट्यसमर्पिता अलौकिकविभावनव्यापारवत्तया कारणशब्दवाच्यतां विहाय लौकिकविभावशब्दवाच्यतां भजन्ते । तेभ्यश्च सुरते दन्तक्षतादिभ्य इव सुखमेव जायते । अतश्च लौकिकशोकहर्षादि-कारणेभ्यो लौकिकशोकहर्षादयो जायन्ते इति लोक एव प्रतिनियमः । काव्ये पुनः सर्वेभ्योऽपि विभावादिभ्यः सुखमेव जायते इति नियमान्न कश्चिद् दोषः । इति ।

आचार्यभट्टनायको ऽपि भगवती सरस्वतीं दिव्यमानन्दरसमेव प्रस्नुवानामङ्गी-कुर्वन्निगदति - वाग्धेनुर्दुग्ध एकं हि रसं यल्लाभतृष्णया ।

तेन नास्य समः स स्याद् दुह्यते योगिभिर्हि यः ॥

एवं हि सारस्वतसृष्टौ चैतन्यस्य नित्यानन्दस्वरूपत्वं प्रतिष्ठितं दृश्यते । न तत्रा ऽनन्दादृते कश्चिदन्यास्वादः ।

तृतीयमपि कारणं साधारणीकरणमिति । काव्यचेतनाया नित्यरसता साधारणीकरणादेव निश्चेतुं प्रत्यभिज्ञातुञ्च शक्या । तत्किमिदं साधारणीकरणं नाम ? तदुच्यते । असाधारणं साधारणं क्रियते ऽनेनेति साधारणीकरणम् (साधारण + कृञ्

+ अभूततद्भावे च्विः करणे ल्युट् प्रत्ययः) सिद्धान्तो ऽ यं काव्यशास्त्रीयचिन्तने सर्वप्रथममाचार्येण भट्टनायकेन प्रत्यपादि । स खलु शक्तित्रयं स्वीकरोति - अभिधां भावकत्वं भोजकत्वञ्च । अभिधया काव्यार्थे स्फुटे सति, भावकत्वशक्त्या सर्वे ऽपि विभावादयो ऽ साधारणाः तत्तदात्मसंस्पर्शशून्या विधीयन्ते । रामस्य सीताया वा (असाधारणं, वैयक्तिकं त्र्प्रात्मसम्पर्कसंवलितं वा) दुःख भावकत्वशक्त्या साधारणीक्रियते । ततश्च तदेव साधारणीकृतं दुःखं (सुखं वा) सहृदयस्स्वदते ।

रामस्य (अ - साधारणं) दुःखं दर्शकस्य (साधारणं) दुःखं कथम्भवतीत्यपि यत्नतो ऽ वधेयम् । वस्तुतश्चित्तवृत्तिसाम्यवशाद्रामस्य असाधारणं सदपि दुःखं दर्शकस्यापि साधारणीकृतं दुःखमुद्बोधयति । एवं हि (नाट्ये) दर्शकः (काव्ये) श्रोता वा रामस्यैव दुःखं सम्प्रत्यात्मीयीकृत्या ऽ नुभवति । विभावादीनामलौकिकतया दुःखस्यापि तस्यानन्दरसनिर्भरं स्वादमात्मसात्करोति । लोके तु परकीयश्शोकोऽयमलौकिकः आत्म-संस्पर्शशून्यतया ऽऽ नन्दरूपेण परिणमति, परकीयस्सन्तप्यात्मीय इवाभाति।

वस्तुतो वासनैव प्राक्तनीदानीन्तनी च रसास्वादहेतुः । प्राक्तनी वासना कथं रसास्वादहेतुः ? तदुच्यते । अस्मिञ्जन्मनि रागिणस्सन्तोऽपि केचन प्राक्तनवासनाऽभाववशात् रसास्वादशून्या एव परिलक्ष्यते । इदानीन्तनी वासना कथं रसास्वादहेतुः । तदप्युच्यते । प्राक्तनवासनावन्तोऽपि श्रोत्रियजरन्मीमांसका इदानीन्तन-वासनाऽभाववशात् रसबोधेऽक्षमादृश्यन्ते । तस्मादभिधत्ते त्र्प्राचार्यधर्मदत्तः,

सवासनानां सभ्यानां रसस्यास्वादनं भवेत् ।
निर्वासनास्तु रङ्गान्तः काष्ठकुड्याश्मसन्निभाः ।

किञ्च, भग्नावरणचितिरिव रसास्वादस्य पृष्ठभूमिः । यावच्चेतनाया आवरणानि ईर्ष्याद्वेषमोहलोभादीनि न भिद्यन्ते न तावद्रसबोधो रसास्वादो वा सम्भवति । त्र्प्रथाऽवरणे भग्ने सति,

निशाकरकरस्पर्शात् चन्द्रकान्ते यथा द्रवः ।

एवं कारणवैशिष्ट्यात् काव्ये साधारणीकृतिः ॥

कारणभूता विभावानुभावसञ्चारिण आवरणे भग्नप्राय एवं रसास्वाद-विषयिणी स्वभूमिकां सम्पादयन्ति । विभावो रत्यादिभावान् विशेषेणा स्वादाङ्कुर-योग्यतामासादयति। यथाह महेश्वरतर्कालङ्कारः

व्यञ्जनया रत्याद्युपस्थापनमेव तद्योग्यता ।

विभावनव्यापाराऽनन्तरं समायात्यनुभावः । अनुभाव आस्वादाङ्कुर-योग्यतामुपगतं रत्यादिभावं रसरूपतया ऽ नुभावयति सहृदयम् । ततश्चान्ते (व्यभिचारिभावः) सञ्चारिभावस्य भूमिकाऽऽलक्ष्यते । रसस्थितिमुपगतान् रत्यादिभावान् सम्यकुतया सञ्चारयति सञ्चारी भावः।

कस्य चैतन्यमनुभवति सहृदयः ? अनुकार्याणां रामादीनामाहोस्विदात्मन एव? अयमपि प्रश्नो रसचर्वणाप्रसङ्गेऽतितरां माहात्म्यं भजते। आत्मन एव चैतन्यमास्वदते सामाजिक इति भट्टनायकाऽभिनवगुप्तौ । यथा कोऽपिशिशुर्म्मृत्तिका-निर्मितगजाश्वादिक्रीडनकानां भावान् तथैव दर्शकोऽपि स्वकीयमेव रत्यादिभावमनुभवति न पुना रामाद्यभिनयं सम्पादयतां नटानां भावं कमपि । यतो हि नटास्ते रामाद्यभिनयं कुर्वाणा अपि भवन्त्यवास्तविकाः । न ते सत्यमेव रामार्जुनप्रभृतयो महापुरुषाः । अतएव रसचर्वणायामात्मचेतनैव सर्वस्वभूता । आत्मचेतनैव विभावादिभिरुद्बोध्यते, सैव वास्वाद्यते । यथाह दशरूपककारः -

क्रीडतां मृण्मयैर्यद्वत् बालानां द्विरदादिभिः ।
स्वोत्साहः स्वदते तद्वच्छ्रोतृणाभर्णुनादिमिः ॥

रसीभूतमिदं चैतन्यं सर्वथा विलक्षणमेव । नेदं चैतन्यं कार्यं, न ज्ञाप्यं, न वर्तमानं, न भविष्यत्कालीनं, न नित्यं न निर्विकल्पकं, न सविकल्पकं, न परोक्षं, न चा ऽ प्यपरोक्षम् । किन्तर्हि? सर्वथा ऽ लौकिकं सहृदयमात्रसंवेद्यम् आत्मानन्दसमुद्भव-स्वरूपञ्च । काव्यशास्त्रीयचिन्तने रसपर्यायभूतस्य चैतन्यस्येदमेव वैलक्षण्यं प्रतिष्ठितं दृश्यते ।

ध्वनिप्रतिष्ठापनाचार्य त्र्प्रानन्दवर्धनः प्रतीयमानार्थमेव काव्यात्मभूतं मेने। यद्यपि तदभिमतः काव्यात्मभूतः प्रतीयमानार्थो रसे एव पर्यवस्यति । तथापि नाऽसौ रसं काव्यात्मभूतमङ्गीचकार । तदत्राऽपि भवितव्यमेव केनचिन्निगूढेन कारणेन । अस्मदुपाध्यायाः पूज्यचरणाश्चण्डिकाप्रसादशुक्लमहाभागा मां कक्षायां निर्दिष्टवन्तो यदर्थभूतस्य काव्य-स्यात्माऽपि को ऽ प्यर्थविशेष एव भवितुं युज्यत इतिकृत्वाऽऽनन्दवर्धनाचार्यो रसालङ्काररीतीर्विहाय सहृदयश्लाघ्यं प्रतीयमानार्थमेव काव्यजीवातुभूतं मेने । शरीरा ऽ त्मनोर्मध्ये ऽ पि सजातीयता काऽप्यपेक्ष्यतएवेति ।

रसस्तु स्वप्ने ऽ पि न स्वशब्दवाच्यः। रसस्तु केवलं प्रतीतिविषयः, केवल-मनुभवसंवेद्यः । अलङ्कारस्तु शरीरस्थानीयं तत्त्वम् रीतिरपि पदसंघटनारूपा काव्यशरीरमेव लक्षयति । न तावच्छरीरस्थानीयमेव तत्त्वं किञ्चित् (काव्य) शरीरस्यात्मा भवितुं शक्नोति। अस्मादेव कारणाद् ध्वनिकारः काव्यात्मान्वेषणे बद्धपरिकरो जातः प्रतीयमानमर्थञ्च काव्यात्मत्वेन प्रतिष्ठापितवान् । अस्मिन् सन्दर्भे भणत्यभिनवगुप्तपादः-

शब्दार्थशरीरं काव्यमिति यदुक्तं तत्र शरीरग्रहणादेव केनचिदात्मना तदनुप्राणकेन भाव्यमेव। तत्र शब्दस्तावच्छरीरभाग एव संनिविशते - सर्वजनसंवेद्यधर्मत्वात् , स्थूलकृशादिवत्। अर्थः पुनः सकलजन संवेद्योन भवति। न ह्यर्थमात्रेण काव्यव्यपदेशः, लौकिकवैदिकवाक्येषु तदभावात्। तदाह - सहृदयश्लाघ्य इति । स एक एवार्थो द्विशाखतया विवेकिभिर्विभाग-बुद्ध्याऽभियुज्यते । तथाहि - तुल्ये ऽ र्थरुपत्वे किमिति कस्मैचित् सहृदयः श्लाघ्यते। तद् भवितव्यं केनचिद् विशेषेण। यो विशेषः स प्रतीयमानभागो विवेकिभिर्विशेषहेतुत्वादात्मेतिव्यवस्थाप्यते। - लोचनम् ।

अनेन एतदुक्तं भवति यत् काव्यार्थ सन्दर्भे ध्वनिकारस्तदनुयायिनश्चा ऽ भिनवमम्मटरुय्यक विश्वनाथजगन्ताथप्रभृतय त्र्प्राचार्या सोपानत्रयं स्वीकुर्वन्ति। तद्यथा.

१. प्रतीयमानस्यार्थस्य काव्यात्मत्वम् ।

२. काव्यात्मभूतस्य प्रतीयमानार्थस्या ऽ वगमेन साधारणीकरणमहिम्ना

सत्त्वोद्रेकः ।

अयमेव सत्त्वोद्रेकश्चित्तविस्तारश्चैतन्यादिर्भावश्चापि कथ्यते ।

३. चैतन्याविर्भावमहिम्ना च रत्यादीनां भावानां रसरुपतया ऽऽ स्वादनम् ।

काव्यार्थस्तावदनुशील्यते । तदनुशीलनेन चैतन्यं तावद्रजस्तमो ऽ भिभववशात् सत्त्वोद्रेकाच्च विस्तृतिमुपयाति । अन्ते च तदेव भग्नावरणचैतन्यं रसरुपतामुपगतं सहृदयैरास्वाद्यते । एवं हि, चैतन्यस्यैव परिणामो (Manifestation) रस इति नात्र कापिसंशीतिः । भट्टनायको ऽ पि तं रसमेव विशिनाष्टि -

काव्ये रसयिता सर्वो न बोद्धा न नियोगभाक् ।

भवतु नाम । उपर्युक्तं सोपानत्रयं कथं चरितार्थतामुपयाति काव्यानुशीलन-प्रसङ्गे इति लोचनकार प्रामाण्येन निबन्धान्ते प्रस्तूयते । आचार्यो ऽ भिनव : स्वसाहित्यगुरोर्भट्टेन्दुराजस्य पद्यमुदाहरति -

यद्विश्रम्य विलोकितेषु बहुशो निःस्थेमनी त्लोचने
यद्गात्राणि दरिद्रति प्रतिदिनं लूनाब्जिनीनालवत् ।
दूर्वाकाण्डविडम्बकश्च निबिडो यत्पाण्डिमा गण्डयो -
र्दृष्टे यूनि सयौवनासु वनितास्वेषैव वेषस्थितिः ॥

पद्यमिदं पठित्वा कथं चैतन्यमाविर्भवति, कथञ्चान्ते रसरूपतया ऽऽ स्वाद्यते इति विशदीकरोति स्वयमाचार्य : -

इत्यत्रानुभावविभावा ऽ वबोधनोत्तरमेव तन्मयीभवनयुक्त्यां तद्विभावानुभावोचित-चित्तवृत्तिवासना ऽ नुरञ्जितस्वसंविदानन्दचर्वणगोचरो ऽ र्थो रसात्मा स्फुरत्येवा ऽ भिलाषचिन्तौत्सुक्यनिद्राधृतिग्लान्यालस्यश्रम-स्मृति-वितर्कादिशब्दा ऽ भावे ऽ पि । लोचनम् ।